पहोत्यु पतमः सर्वेष्वेव यतःस्मृतः। अन्योवा सर्वरूपस्तु न साध्यो पह उच्यते"। "कुमारभृत्याकुशलैरनुष्ठिते भिषग्वराप्तै रथ गर्भभर्मणि" रघुः।

**कुमारयु** पु० कुमारं कौमारं याति या—कु मित्वयादि० नि०। युवराजे उज्ज्वलदत्तः

**कुमारललिता** स्त्री "कुमारललिता ज्सगाः" वृत्त०र० उक्ते १सप्ताक्षरपादके छन्दोभेदे। कुमारं सुन्दरं ललितं चेष्टितं, तादृशं ललितं, वा यस्य। २सुकुमारचेष्टायां न०। ३तद्युक्ते त्रि०।

**कुमारवाहिन्** पु० कुमारं स्कन्दं वहति वह—णिनि। मयूरे शब्दरत्ना०। कुमारवाहनत्वात्तस्य तथात्वम्। वह—स्वार्थे णिच् ल्युट् ६त०। कुमारवाहनमप्यत्र न०।

**कुमारसम्भव** न० कुमारस्य कार्त्तिकेयस्य सम्भवमधिकृत्य कृतोग्रन्थः अण् आख्यायिकायां तस्य लुक्। कालिदास प्रणीते महाकाव्यभेदे।

**कुमारसू** स्त्री कुमारं स्कन्दं सूते सू—क्विप् ६त०। १गङ्गायाम् २हैमवत्याञ्च हेमच०। तयोस्तदुत्पत्तिस्थानत्वात् तथात्वम् कुमारजनन्यादयोऽप्यत्र

**कुमारहारित** पु० यजुर्वेदसम्प्रदायप्रवर्त्तके ऋषिभेदे "कुमारहारितात् कुमारहारितः" शत०ब्रा० १४,५,५,२२,

**कुमारिका** स्त्री कुमारी—स्वार्थे क संज्ञायां कन्, कुमार—ण्वुल् वा। १अनूढकन्यायाम् २नवमल्लिकायां ३स्थूलैलायां रत्नमा०। ४घृतकुमार्य्यां ५कुमारीशब्दार्थे। भारतवर्षस्य नवसु खण्डेषु ६खण्डभेदे यथाह सि०शि०। "ऐन्द्रं कशेरुशकलं किल ताम्रपर्णमन्यद्गभस्तिमदनस्य कुमारिकाख्यम्। नागञ्च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्व्वसंज्ञमिति भारतवर्षमध्ये। वर्ण्यव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्त्यजजनाः निवसन्ति सर्वे" कशेरुशब्दे १८३५पृ० विवृतिः

**कुमारिन्** त्रि० कुमारोविद्यतेऽस्य इनि। कुमारयुक्ते "पुत्रिणा ता कुमारिणाः ऋ०८,३१,८ कुमारिणौ दम्पती इत्यर्थः सुपां सुलित्यादिना पा० औस्थाने आच्।

**कुमारिल** पु० मीमांसकभेदे "साधु कुमारिल स्वामिन्! साधु" प्रबोधच०

**कुमारी** स्त्री कुमार+प्रथमवयोवचनत्वात् स्त्रियां ङीप्। १अनूढकन्यायां वर्षभेदेन तन्नामभेदाः कालसङ्कर्षाशब्दे उक्ताः तन्त्रसारे तत्पूजाफलसहितानामभेदा अन्यथा उक्ता यथा "होमादिकन्तु सकलं कुमारीपूजनं विना। परिपूर्णफलं न स्यात् पूजया तद्भवेद्ध्रुवम्। कुमारीपूजया देवि! फलं कोटिगुणं भवेत्। पुष्पं कुमार्य्यै यद्दत्तं तन्मेरुसदृशं भवेत्। कुमारी भोजिता येन त्रैलोक्यं तेन भोजितम्"। तत्र कुमारीनिर्णयः जामले "एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती। त्रिवर्षा त्रिविधा मूर्त्तिश्चतुर्वर्षा च कालिका। सुभगा पञ्चवर्षा तु। षड्वर्षा च उमा भवेत्। सप्तभिर्म्मालिनी साक्षादष्टवर्षा च कुब्जिका। नवभिः कालसङ्कर्षा दशभिश्चापराजिता। एकादशे च रुद्राणी द्वादशाब्दे तु भैरवी। त्रयोदशे महालक्ष्मीः द्विसप्ता पीठनायिका। क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका स्मृता। एवं क्रमेण संपूज्या यावत्पुष्पं न दृश्यते। प्रतिपदादिपूर्णिमान्तं वृद्धिभेदेन पूजयेत्। महापर्व्वसु सर्वेषु विशेषाच्च पवित्रके। महानवम्यां देवेशि! कुमारीञ्च प्रपूजयेत्। "कुमारिका ह्यहं नाथ! सदा त्वं हि कुमारिका। अष्टोत्तरशतं वापि एकां वापि प्रपूजयेत्। पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यवमानिताः। कुमारी योगिनी साक्षात् कुमारी परदेवता। असुरा दुष्टनागाश्च ये च दुष्टग्रहा अपि। भूतवेतालगन्धर्व डाकिनीयक्षराक्षसाः। याश्चान्याः देवताः सर्वा भूर्भुवःस्वःस्थभैरवाः। पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम्। ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः। ते तुष्टा सर्वदेवाश्च यस्तु कन्यां प्रपूजयेत्। विधियुक्तं कुमारीञ्च भोजयेच्चैव भैरवीम्। पाद्यमर्घ्यन्तथा धूपं कुङ्कुमञ्चन्दनं शुभम्। भक्तिभावेन संपूज्य कुमारीभ्योनिवेदयेत्। प्रदक्षिणत्रयं कुर्य्यादादौ मध्ये तथान्ततः। पश्चाच्च दक्षिणा देया रजतं स्वर्णमौक्तिकैः। दक्षिणाश्च कुमारीभ्योदद्यात् प्रक्रमतस्ततः। विवाहयेद्यस्तु कन्यां ब्रह्महत्यां विनश्यति। गोहत्या च स्त्रीहत्या च सर्वपापं प्रणश्यति। यो यश्च पुण्यकाले च कन्यादानं प्रकल्पयेत्। वालुकासागरं ज्ञेयं तावदब्द सहस्रकम्। एकैकं कुलमुद्दिश्य रुद्रलोके महीयते" कन्यादानन्तु तत्तद्देवताप्रीतये इति सम्प्रदायः। वस्तुतस्तु तत्तद्वर्षायाः कन्यायास्तत्तद्देवताबुद्ध्या शिवरूपत्वं सम्प्रदानीये विभाव्य दद्यादिति रहस्यार्थः" कृष्णानन्दः। "सं प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते इति स्मृत्युक्तायां २द्वादशवर्षीयकन्यायाम् ३पार्वत्याम् ४नवमल्लिकायां ५नदीभेदे ६घृतकुमार्य्याम् तत्पर्य्यायगुणादि भावप्रकाशे उक्तं यथा "कुमारी गृहकन्या च कन्या घृतकुमारिका